No. ६३० - घ

Title दीपमालादिदिनकृत्यविधिः

Author

Extent १० Age

Subject धर्मशास्त्रम् . अपूर्णम्

नं० ६३० – घ

दीपमालादिदिनकृत्यादिविधिः

पत्राणि

नं० ५३० – घ

१० पत्रे

one to four missing on १० पत्रे

नं० ६३०-घ

(धर्मशास्त्रम्)दीपमालादिदिनकृत्यविधि: (अपूर्णम्)

पत्राणि १० (दश)

१४ (अपूर्णम्)

दीपमाला दिनकृत्यं होलिकायां जन्म अष्टमी पारणा जन्मदिन कृत्यं गृहारंभ विधा रंभ हलारंभ कार्तिक स्नानविधि

अथ दीपमालादिनकृत्यं दीपोत्सवस्य वेलायां प्रतिपद् दर्शने यदि अवश्यं सा तिथिस्त्याज्या यथा नारी रजस्वला १ दीपमाला
न कुर्वीत प्रतिपन्मिश्रिता क्वचित् श्रीस्तत्र विनश्यंति प्रजा गावो महीपतिः २ दीपमाला महारात्रिः सुखरात्रिरिहोच्यते तस्याः प्रदोषे ल
क्ष्मीं च पूजयित्वा च भुंज्यते ३ दिवा तत्र न भोक्तव्यं बालवृद्धातुरान्विना प्रदोषसमये लक्ष्मीः रजनीयां विशेषतः ४ तत्र क्रमः
प्रदोषसमये देवालये मित्रविप्रतुलसीचतुष्पथश्मशाननदीपर्वतगोष्ठादिषु दीपान्प्रज्वाल्य दीपवृक्षान्निर्माय दीपमाला
वृतस्थाने नूतनवस्त्ररत्नमाल्याभरणादिभूषितनिजमित्रकलत्रपुत्रभृत्यादिपरिवृतः प्रसन्नमना उपविश्य काञ्चनम
यादिपात्रेष्टदलपद्मं कुंकुमादिना विलिख्य तत्कर्णिकायां रजतस्वर्णादिमुद्रां श्रीयंत्रं वा स्थाप्य प्राणायामगणेशपूजादि संकल्प
ओं अद्य प्रदोषे यथालब्धोपचारैर्महालक्ष्मीमहं पूजयिष्ये इति संकल्प ओं श्रीश्च ते लक्ष्मीश्च इति मंत्रेणावाहनादिनार्चयेत्
अथ ध्यानं ओं या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी गंभीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ल
क्ष्मीः दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुंभैर्नित्यं सा पद्महस्ता वसतु मम गृहे पुत्रपौत्रेषु नित्यं इति ध्यात्वा पुष्प
धूपदीपपक्वान्नपुष्पमालावस्त्रदक्षिणाभिरर्चयेत् ततः पुष्पेण ओं नमस्ते सर्वलोकानां वरदासि हरिप्रिये या गतिस्त्व
त्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ओं लक्ष्म्यै नमः इति त्रिवारं जपेत् रूपं देहि जयं देहि भाग्यं भगवति देहि मे आयु
रारोग्यमैश्वर्यं पुत्रकामांश्च देहि मे ततो लक्ष्मीसूक्तं लक्ष्मीस्तोत्रं पठनीयं मूलमंत्रश्च अयुतं वा सहस्रं वाष्टोत्त
रशतं जपनीयः ततः कुबेरं पूजयेत् ओं धनदाय नमस्तुभ्यं निधिपद्माधिपाय च भगवन्त्वत्प्रसादेन मे धनधान्या

मनपंचकं। भीष्मपंचकं। ...विधिः। गोदानविधिः। ... चंद्रदर्शन
निषेधः। ... विधिः। ... मलमासविधि ... विधिः। ...

दिसंपदः १ इति प्रार्थयेत् ततश्च स्वत्रदीपमालादर्तद्देशे प्रणवद्विजान्भोजयित्वा मित्रपुत्रादिभिः स्वयं भुंजीत रात्रौ च द्यूतक्रीडा च वरपयैवं
कार्या वर्षपरीक्षणे दीपावलीनिशायां द्यूते जये वर्षजयो ध्रुवं यालक्ष्मीर्दिवसे पुत्पादीपावल्यां तु भूतले गवां गोष्ठे च कार्तिक्यां
5 सालक्ष्मीर्वरदा मम इति मंत्रेण पूजनाद्द्यूते जयः १ यथा पतिव्रता नारी त्रस्ले कालेष्व बुध्यते एवं भर्तुस्तथालक्ष्मीः प्रकृहरेद्वी द
शाहकं २ त्वं ज्योतिः श्रीरविश्चंद्रो विद्युत्सौवर्णतारिकाः सर्वेषां ज्योतिषां ज्योतिर्दीपज्योतिःस्तते नमः ३ मंत्रेनानेन कमलां दीप
हस्ताः स्त्रियो द्विजाः देवीं प्रबोधयेयुश्च ततकुर्युश्च भोजनं ४ राजा च निशीथसमये स्वपुरं सुधाधवलितहट्टभूमिं नत्पगी
तादिव्यग्रनरनारीसकं समंततो ज्वालितदीपावली द्योतध्वस्तध्वांतसंचारं परिभ्रमद्वारविलासिनीजनमवलोकयितुं पद्भ्यां एव
स्थाने स्थाने राजमार्गं गच्छेत् निशीथे च लक्ष्मीर्भ्राम्यमाणा द्योतमानं गृहमाश्रयते ततो गृहे रात्रौ दीपाज्वालनीया गीतहास्यादिकं
च कार्यं भांमिल्य माल्यगंधाम्बरस्याग्युः विभूषितानां गनाभिः स्वास्तिते मंचके स्थापितव्यं तन्निशायां मैथुने त्विनदोषः यामे
चतुर्थे नारीभिः सूर्पडिंडिमवादनैः निष्कास्यते ग्रहयामिरलक्ष्मीः स्वगृहांगणात् सुप्तप्रबुद्धा श्रीर्निरालंबाश्रयैषिती स
प्रकाशरूपं गृहं रात्रौ तस्य मालंवते त्विदं १॥ इति अपव्यतीपातदानविधिः॥ तद्दिने नद्यादौ स्नात्वा शुचिलिप्त भुवि। प्राक्करापूरि
तघटं स्थापयित्वा तदुपरि ताम्रपात्रं तदुपरि हेमपद्मं तत्कर्णिकायां माद्दशांगुलं हैमं नरं चन्यस्य गंधादिभिः स्तनमभ्यच्य न
मस्ते स्कव्यतीपात सोमसूर्यसुत प्रभो यद्दानादिकृतं किंचित तदनंतमिहास्तु मे इत्युक्त्वा पंचरत्नान्वितपुष्पाक्षतांजलिं तत्र
सं प्रक्षिप्य गुरवे दत्वा ब्राह्मणान्भोज्य स्वयं भुंजीत एवं प्रतिमासं कृत्वा त्रयोदशवारं चतुर्दशके वारे व्यतीपाताय स्वाहेति सं ५

रवृत्तसमिद्भिराज्यक्षीरफलानां शतं हुत्वा शर्करायुतं घटं हेमनरं सोपस्करां शय्यां च दद्यात् भूरिभोजनदक्षिणां वं देव्य
तीपातमहं मा हांतरवौ दुस्तरं तुं सकलेष्टसिध्ये समस्तपापस्य मम क्षयो स्तु पुतपस्य चानंतफलं समास्तु १ गुरुं च भूष
णवासोभिः संतोष्य गां दत्वा शय्यां समर्पयेत् इति व्रतार्कतउद्धृतं अथ होलिकापूजनं आचम्य प्राणायामः ओमद्ये
सकुटुंबात्मरक्षार्थमायुर्यादिभयापहारार्थं डाडाहुंढाहोलिकादि शांति पूर्वकं सकलारिष्टनिवारणार्थं होलीपूजन
महं करिष्ये विधिवदग्निं संस्थाप्य संपूज्य धानाहोमः प्रकर्तव्यो मंत्रैरक्षोघ्नसूक्तेन होलिके त्वं जगन्मज्या
कृता त्वं होलि बालिके अतो मां पाहि भीतिभ्यो मम पुत्रांश्च सर्वदा १ आयुर्देहि यशो देहि श्रीमूर्तानां रक्षणं कु
रु शत्रूणां च क्षयं देहि होलिके पूजिता सदा इति प्रार्थ्य धूपदीपादि दत्वा तन्नाग्नेः त्रिः प्रदक्षिणं गायंतु च
हसंतु च जल्पंतु स्वेच्छया लोका यस्य यस्य च यन्मतं होलिके च नमस्तुभ्यं ढुंढाते जो विमर्द्दिनि सर्वोपद्रवनाशाय गृहाणा
र्घं नमोस्तु ते इत्यर्घं दत्वा यन्मया शीतभीतेन न विहिताचरणं कृतं तत्सर्वं क्षम्यतां भद्रे वह्निरूपतः सर्वसहो भवान्
इति संप्रार्थ्य भोजनदक्षिणां संकल्प विधाय वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च अतस्त्वं पाहि मां दे
वि विभूते भूतिदा भव इति विभूतिमभिवंद्य तिलकं तांबूलादि धाना प्रोक्षं च सर्वैः शय्यं रात्रौ गानं क्रीडनं च कार्यं
इति होलीपूजा अथ ग्रहणनिर्णयविचारः ग्रहणे नरो तु रात्रावपि स्नानदानजपहोमश्राद्धादिकमक्षयफलं ॥

चंद्रग्रहणो कालस्या चंद्रार्कग्रहकालस्या लात्प्राक् त्रिचतुष्कप्रहराक्रमनात् त्यक्त्वा मोक्षगतिं दृष्ट्वा दत्वाद्यात्स्नानपू
6 र्वकं १ निशीथोत्तरं चंद्रग्रहे दिवा भोजनेन दोषः श्राद्धकारितो भोजनजन्यमशौचं भवत्येव ॥ मुक्ते शशि
नि भुंजीत यदि न स्यान्महानिशा स्नात्वा दृष्ट्वा परेऽह्नि तद्यान्न स्तास्तमितयोस्तयोः १ यावच्चंद्रसूर्ययोश्चाक्षुष
ज्ञानविषयत्वयोग्यत्वं तावानुन्यकालः तेन स्वयमदर्शनेऽपि परैर्दृश्यमानत्वात् पुण्यत्वं दर्शनानंतरं मेघादिछि
न्नत्वेऽपि पुण्यत्वं अस्तगतयोस्तु न पुण्यत्वं तद्योग्यताया अभावात् तत्र ग्रह दिने उपवासे चंद्रसूर्यलोकाधिः किं ते
नै मोक्षनिश्चये मेघादिना तद्दर्शनेऽपि स्नात्वा भोजनेन दोषः आदौ स्नानं ततो दानं श्राद्धं होमं पुनर्जपं सूर्यचंद्र
वि ग्रहे कार्यं मुक्ते स्नानमेव च ग्रहणकाले यन विषवसंक्रांतौ च गंगा नर्मदा सरस्वतीनां स्मरणो क्तं तु स्नातं दर्शने
गोदानं स्पर्शे गोमेधः पाने सौत्रामणिः स्नाने अश्वमेधः ग्रहे गंगा समं तोयं सर्वे व्याससमा द्विजाः कूपोदकेऽपि स्ना
ग्रहकाल एव जलोद्धरणं यत्र पूर्णायां चंद्रस्य हस्तयोगो वृश्चपते तत्र दानोपवासाद्यं तपं शंति मन्वाद्याः युगा
दयः युगांताः न जपहोमद्विजभोजनाद्यं तपं ॥ चैं॰ स्नि॥ अथ जन्मादिनकृत्यं तत्र तिलैरुद्वर्त्य तिलैः स्नात्वा शुक्लांबर
धरो गृहे उपविश्यासने आचम्य प्राणायामं अद्य वर्षवृद्धि दिने आयुरभिवृद्ध्यर्थं मार्कंडेयादि चिरंजीवि पूजनमहं करिष्ये इ ६
ति संकल्प्य गणेशादि मर्पूजां विधाय ताम्रपात्रस्य जले पद्मादिस्थाप्य कृतपूजेषु वा अश्वत्थामबलिव्यासहनुमद्वि

भीष्मद्रोणकृपपरशुराममार्कंडेयस्वजन्मनक्षत्रप्रजापतिक्रमेणावाह्य पाद्यार्घादिषोडशोपचारैरर्चयेत् ततोऽप्रार्थना मा
र्कंडेय महाभाग सप्तकल्पांतजीविन: चिरंजीव यथा त्वं भो भविष्यामि तथा मुने १ द्रोणपुत्र नमस्तेस्तु नमो रुद्रस्वरू
पिणे आयुरारोग्यमैश्वर्यं देहि शान्तिं च नाशय २ दैत्येन्द्रकुलसंभूत हरेश्चैव लोकप्रापक धर्मनिष्ठ वत्सेदात
नमस्कृत्य मम सर्वं कुरु ३ व्यासदेव नमस्तुभ्यं वेदविस्तारकारक प्रज्ञां देहि धनं देहि यशो देहि द्विजोत्तम ४ विभीष
ण नमस्तुभ्यं नमः पौलस्त्यनन्दन: विभीषण मम मारीस्त्वं निर्भयं मां कुरु स्वयं ५ कृपाचार्य नमस्तुभ्यं धनु:शा
स्त्रविशारद आयुरारोग्यदानाय कृपया कुरु मे पते ६ रेणुकागर्भसंभूत जामदग्न्य नमोस्तु ते विनाशय मे
सतिलं मधुरं दुग्धपाने मंत्र: सतिलं गुडसंमिश्रमंजल्यर्द्धमितं पय: मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये १ तद्दिने मधुरं
भोक्तव्यं आमिषं वर्ज्यं ब्रह्मचर्यं कार्यं आमिषत्यागे जन्मांतरे श्रोत्रियत्वं १ स्त्रीत्यागे श्रीवृद्धि: जीवन्मत्स्यानां जले प्रवेशने आयुर्वृ
द्धि: खंडनं नखकेशानां मैथुनं मार्गमेव च आमिषं सकलं हिंसां वर्षवृद्धौ विवर्जयेत् १ तिलोद्वर्ती तिलस्नायी तिलहोता
तिलप्रद: तिलभक्ता तिला वापि षट्तिली नावसीदति २ सिद्धार्थपोटलीकरे धार्य: चिरंजीविप्रीतये द्विजा भोज्या: गुर्वग्नि
मातापितर: पूज्या: महोत्सवो गीतनृत्यादि अथ पुत्रजन्मन: षष्ठे दिवसे षष्ठीपूजनं तत्र प्रदोषसमये सूतिकागृहे गणपति
सहितं गौर्यादिपूजनं षोडशमातृ: राभ्युदयिकवत्षोडशोपचारैरर्चयेत् तत: षष्ठिके दुर्गायै इत्यादिना षष्ठी पूज्य प्रार्थयेत्

हस्तगतोमस्ते

गोप्यीस्कोंदः पुत्रो येषां प्रिमुसं रक्षितस्त्वया तथा ममाप्ययं वालो रक्ष्यतं षष्ठिके नमः ॐ षष्ठिकायै नमः इति त्रिः पूजयेत् ॐ रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सार्वान्कामान्प्रदेहि मे १ ॐ षष्ठिके क्षमस्वेति विसर्जनं ततः कृत्तिकाः शिवाः संभूति नामा च कीर्त्तिः संततिरेव च अनुसूया क्षमा चैव षडेताः कृत्तिका मता १ इति प्रणवादि नमोन्तदेत नामभिरेताः पूजयेत् शुभं भवति ॥ गृहारंभे ज्योतिःशास्त्रानुसारेण खनं तं कृत्वा वास्तोष्पतिमावाहनादिना सम्पूज्याथ नानान्धरित्रीं च संपूज्य प्रार्थयेत् ॐ हिरण्यगर्भे वसुधे शेषस्योपरिशायिनि वसाम्यहं तव पृष्ठे गृहाणार्घं धरित्रि मे इति दधिभक्तमाम्रपत्रं च गर्त्ते निक्षिप्य मृत्तिकया पूरयेत् इति ॥ विद्यारंभे गणेशं विष्णुं लक्ष्मीं सरस्वतीं विद्याधरं तत्स्त्रकारं गुरुं च पूजयित्वा विद्यामारभेत् इति हलारंभे स्नात्वा क्षेत्रं गत्वा गर्त्तं खनित्वा प्रजापतिं नवग्रहं भूमीं आवाहनादि पंचोपचारैः संपूज्य दधिभक्तमाम्रपल्लवं क्षिप्त्वा हले योज्यो हलाग्रे हेमयोज्यं भग्नशृंगखुरत्वां गलाः कपिलाश्च वृषा न योज्या हलवाहकाः क्षमाः हलं हृढं शुभं वृषनद्धं चतुर्गुणं सस्यं ॥ एकादशपकर्षे शाततीपापर्यि सिद्धिदा पंचमी या भवेद्देषा वहुसस्यफलादि सा अतः कार्त्तिकेन कर्त्तव्यं महादोषस्ततो भवेत् इति ॥ अथ कार्त्तिककृत्यं विशेषतः कार्त्तिके भूप्रायन ब्रह्मचर्य पत्रावल्यधिकरणक हविष्यभोजन दामोदरार्चनैः सर्वपापनाशपूर्वक हरिसान्निध्यप्राप्तिर्द्दारतीव मोदः पलाशपत्रावलीशास्त्रापरं ब्रह्मरोतरे मध्यस्य पत्रहेयं क

पिल्लायाः पयः पीत्वा भुक्त्वा पत्रेतथैश्वरे ब्राह्मणांश्च पदास्पृश्य शूद्रो नरकमश्नुते १ मौनेन भोजनं कार्यं कार्त्तिकव्रतधारि
णा घृतेनाथ तिलतैलेन दीपदानं प्रशस्यते १ आश्विनस्यासिते कादश्यां शुक्ला वा तुला संक्रांतिवारभ्य अखंडदीपदानेन दिव्यवि
मानारोहपूर्वक वैकुण्ठाधिकरणाकभोगलाभः परकीयदीपरक्षणो नापि सुगतिश्च किं पुनः स्वदीपदानेन दीपश्च गोविं
दालये तुलस्यां द्विजालये वा आकाशे वा देयः इति अथ यमपंचकं तत्र त्रयोदश्यां वहिर्यमदीपदानादपमृत्युनाशः
तत्र मंत्रः मृत्युना पाशहस्तेन दंडाभ्यां जरयामलया सह त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतामिति १ अतो दिनं च य
मतर्पणं कार्यं जीवत्पिता न कुर्वीत तर्प्पणं यमभीष्मयोः चतुर्दश्यां मकरोदये विधूदये तिलतैलेनोद्वर्त्यापामार्गं
तुंबीचक्रमर्दकं सीतालोष्टसमायुक्तं सकंटकदलान्वितं हरपापमपामार्ग भ्राम्यमाणः पुनः पुनरिति मंत्रेण मू
र्द्धि भ्रामयन्स्नायात् तैलेतल्लक्ष्मीः जले गंगा दीपावल्यां चतुर्दशी चंद्रोदये तु यः स्नायाद्यमलोकं न पश्यति १ ततो
यमचित्रगुप्तशिवदुर्गापितृशास्त्रहतादिप्रीतये दीपदानं कार्यं॥ अमावस्याचतुर्दश्योः प्रदोषे दीपदानतः य
ममार्गांधकारेभ्यो मुच्यते कार्त्तिके नरः १ चतुर्दश्यां शैववटुकतपोधनब्राह्मणभोजनदानेन यमलोकादर्शनं क्र
तु शतानाधिकपुण्यप्राप्तिश्च शिवसांनिध्यम् तत्र भौमवारचित्रानक्षत्रयोगे शिवदर्शनात् शिवलोकप्राप्तिः इति
अथ भीष्मपंचकमाहः॥ एकादश्यां स्नात्वा देवादीन्संतर्प्य दिनपंचकव्रतं गृह्णीयात् अखंडदीपज्वालनं भूमि

ष्यां फलाहारादि एकादश्यां पद्मैर्हरिः पादार्चयेत् विल्वपत्रैर्जानुनी १३ तुलसीपत्रदलैर्नाभिः १४ जातीपुष्पैः स्कंधौ १५
४ मालतीपुष्पैः शिरः पूजयेत् ११ गोमयं गोमूत्रं गोमेयः गव्यं घृतं गव्यं दधि पिबेत् ५ पंचमे द्विर्राधादामोदरप्रीतये
द्विजदंपती पूजयेत् भोजयेच्च पायसादि कांचनवस्त्रनादि च दद्यात् षष्ठे दिवसे हरिं द्विजान्भोजयित्वा तेभ्यो दक्षिणां द
गृह्णीयात् ततो बंधुभिः सह स्वयं भुंजीत एवं हरिं तुष्टिः गात्राभ्यंगं स्त्रीसेवां रोभ्यंगं मधु मांसं च मैथुनं ताम्बूलं जवार
ध्वं दंतधावं विवर्जयेत् अथ भीष्मार्घः सत्यव्रताय शुचये गांगेयाय महात्मने भीष्माय एष दास्यर्घमाजन्म
ब्रह्मचारिणे १ वसूनामवताराय शंतनोरात्मजन्मने अर्घं ददामि भीष्माय सोमवंशोद्भवाय च २ वैयाघ्रपद्यगो
त्राय सांकृतिप्रवराय च अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ३ कार्तिके मासे तुलसीधात्रीमालाधारणं
तन्मन्त्रैर्हर्य्यर्चनं तदधः श्राद्धकरणं भागवतगीतापारायणं महाफलं अष्टाक्षरादिजपे मुक्तिफलम् मानुषः कर्म
भूभोयः कार्तिकं न यते मुधा चिंतामणिं करे प्राप्य त्रिप्यते कर्दमांबुनि इति कार्तिकम् अथ वृषभदानविधिः ग
णेशादि पूजनं विधाय सोपकरणं वृषभं ब्राह्मणं च पूजयेत् ततो द्विजवरं तोतदं गत्वेन ततो मंत्रः धर्मस्त्वं वृषरू
पेण ब्रह्मणा निर्मिता पुरा अष्टमूर्तिरधिष्ठानः मतः पाहि मां दुःखतान्भुवि श्रीपतां धर्मराजो मे प्रीणि पतन्या विसर्जये
त् सप्तजन्मकृतं पापं वाङ्मनः कायकर्मभिः तत्सर्वं विलयं याति वृषदानेन संशयः १ अथ संकल्पः ॐ अद्येत्यादि ८

दशधेनुदानजन्मफलसंसारपरित्राणसप्तजन्मावछिन्नवाङ्मनःकायकृतसर्वपापक्षयसुतेजोदीप्यमानगंधर्वसरःसं
कीर्तिन्नरकसमाकुलकामगदिव्ययानारोहणपूर्वकवृषभरोमसंख्यावत्सरावछिन्नस्वर्गप्राप्तितदुत्तरेहलोकेकान्
पत्वसर्वजाजित्वमहत्तेस्कत्ववीतसोकत्वनिरामयत्वकामोहमनुंधुकारंवोकारमतिपुष्यांगंद्युतिमंतंभद्रंशीलमत्तंकृत
सर्वदोषविवर्जितंस्वर्णशृंगंरौप्यखुरंमुक्तापुच्छंवस्त्राच्छादितंपालंकृतंपट्टवस्त्रविभूषितंपुष्टंवृषभंरुद्रदैवतंअमुकगोत्रा
येत्यादि दक्षिणावृषभपुच्छग्रहणांतं इतिवृषभदानविधिः॥अथगोदानविधिः॥गावःपवित्रमतुलंगावोमंगलमुत्तमं
यासांखुरोत्थितारेणुर्गंगावारिसमोभवेत् १ शृंगाग्रेसर्वतीर्थानिखुराग्रेसर्वपर्वताः शृंगयोरंतरेयस्याःसाक्षाद्गौरी
महेश्वरी २ दीयमानांचगांदृष्ट्वा नृत्यंतिप्रपितामहाः प्रीयंतेऋषयःसर्वेतुष्यामोदेवतैःसदा ३ रोरूयंतेचपापा
निदारिद्र्यव्याधिभिःसह धात्र्यःसर्वस्यलोकस्यगावोमातेवसर्वदा ४ गावस्कन्धानमस्कृत्यकृत्वाचैवप्रदक्षिणां
प्रदक्षिणीकृर्कुर्वीतकृतातेनसप्तद्वीपावसुंधरा ५ गोमूत्रंयमुनासाक्षात्गोमयंनर्मदाशुभाः गंगाक्षीरंतुयासांवै
किंपवित्रमतःपरं ६ नीराजयतयोगानिगवांपुछेनभाग्यवान् अलक्ष्मीःकलहोरोगास्तस्यागाच्छातिदूरितः ७ गो
भिर्विप्रैश्चवेदैश्चसतीभिःसत्यवादिभिः अलुब्धैर्दानशीलैश्चसप्तभिर्धार्यतेमही ८ यत्रक्षीरवहानद्यो यत्रपायस
कर्दमः नजराबाधतेयत्रतत्रगछंतिगोप्रदः ९ श्रुतिस्मृतीतुनेत्रेद्वे पुराणंहृदयंस्मृतं श्रुतिस्मृतीभ्यांहीनो

धः कालास्यादेकया विना १० पुराणहीना — — त्कालांधाः चपितौ वदो एतादृशायपात्राय प्रदातव्याधेनुरुत्तमाः ११
गोपुच्छे तुरगः कर्णे दासी मूर्द्धि करी करे महिषी शृंगे वृषः स्कंधे गृहं स्तने पुरं पृष्टे १२ हलाग्रे स्यंदनं चक्रे पल्ली देया
कुचाग्रतः आजाविका न्नानि मध्ये उष्ट्रः कंठे खरः पदोः १३ प्रोक्तानि दानानि द्विजहस्तमध्ये॥ ओं नमो गाय॥ ततः दान
विधिः यजमानः सुस्नातः प्रक्षालितपादः गोमयोपलिप्तभूमौ स्वासने समुपविश्य कुशहस्त आचम्य प्राणायामः देवा
न्गुरून्नत्वा ओं मद्य श्रुतिस्मृति पुराणोक्त फल प्राप्तिकामः श्री यज्ञपुरुषगोविंद प्रीतये गोदानमहं करिष्ये ततः गणे
शादीनि संपूज्य॥ धेनवे नमः ब्राह्मणायनमः इति देव ब्राह्मणौ त्रिः संपूज्य गां ददानीति द्विजकरे जलदानं त
तो वरणद्रव्यमादाय ओं मद्यामुकगोत्र ममुक शर्माणं ब्राह्मणमेभिर्गंधचंदनपुष्पाक्षतवासस्तांबूल हेमालं
कार फलादिभिर्गोदानार्थं त्वामहं वृणे इति वृणुयात् वृतोस्मीति प्रतिवचनं यदर्चनं कृतं विप्र तवकुर्वस्वरूप पिताः
तत्सर्वं मम दानस्य विष्णुर्वे सु समर्पताम् इति प्रार्थ्य स्वपुरतः प्राङ्मुखीं गां स्थाप्य वत्सयुक्तं स्तोन्यसेत् ततो दध्ना
गोखुरानुपलिप्य जलेन प्रक्षाल्य गंधादिभिर्गामर्चयेत् सर्वदेवमयं देवि चंदनं मलयोद्भवं कस्तूरीकुंकु
मानं च गोगंधः प्रतिगृह्यतां १ गंधः अपावाहनं न्यासौ ततः पुच्छं करे गृहीत्वा कुशजलैस्तर्पयेत् ततः संक
ल्पः ओं मद्यामुक मासे शुक्लपक्षे मुकतिथौ यथानामवार करण योगादि संयुतायां सकलपापक्षय पूर्वकं शात ९

कुलतारणानंतरं इहलोके पुत्रपौत्रादिधनधान्यसत्कीर्त्तिकामः गंधर्वाप्सरोगणाकर्णिकिंकिणीजालमालावितानमंडितविमानपरमसुखभोगान्वितस्वर्गलोकावाप्तिकामः इमांगां रुद्रदैवतां स्वर्णशृंगीं रौप्यखुरीं ताम्रपृष्ठीं घंटाचामरभूषितां सवत्सां कांस्यदोहां युक्तां लांगूलभूषितां श्रीगोविंदप्रीतये यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे स्वस्तीति प्रत्युक्तिः ततो ब्राह्मणेनेत ह्योदान प्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय० नमो गोभ्यः श्रीमातृभ्यः सौरभेयीभ्य एव च नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमः १ वंदितासा वसिष्ठेन विश्वामित्रेण धीमता कपिले हर मे पापं जन्मयाद्वर्वसंचितं इति प्रार्थना ततः प्रदक्षिणा॥ यादेवी सर्वभूतेषु या च देवी व्यवस्थिता धेनुरूपेण सा देवी मम पापं व्यपोहतु १ गावो मे चाग्रतः संतु गावो मे संतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहं ॥२॥ इति गोसावित्रीविधिः॥ यथाशक्ति ब्राह्मणभोजन॥ अथ देवशयने नियमे फलानि॥ चातुर्मास्ये गुडवर्जनात्स्वरमाधुर्यं तैलवर्जने सततिर्दैर्घ्यं घृतस्य वर्जनात्सुंदरांगत्वं एवं वर्जनादिति योऽयं कटुतैलस्य प्राशुनाशः मधूकतैलस्य सौभाग्यपुत्राद्भोगस्य स्वर्गे विद्याधरता कटुतिक्तमधुरक्षारादीनां वैरूप्यदौर्गंध्याभावः तांबूलत्यागे कंठता पादाभ्यंगत्यागे अभ्यंगयोः तेजस्वित्वं व्याघ्रयक्षत्वं दधिदुग्धयोः स्वर्गः स्थालीपाकस्य स्वर्गः मंचकस्य त्यागे पार्श्वदता मद्यमांसयोर्व्याध्याद्यभावः परान्नस्य चांद्रायणं अथ विधिः योगाभ्यासाद्ब्रह्मपदं एकभक्तान्मुनित्वं एकांतरोपवा

साद्ब्रह्मलोकं नखरोमधारणात्प्रत्यहं गंगास्नानं मौनादखलितवाक्यता पञ्चावली भोजनाद्राज्यं अष्टाक्षरजपा

10 दनंतफलं विष्णुनतेरन्वहं गोदानं हरिपादस्पर्शनात्कृतकृत्यता विष्णवालये लेपनमार्जनाद्याः कल्पं वैकुंठवासः इति

नियमानि एकादश्यां संकल्प्य व्यतिरेकेण ण्युपवासः कर्तव्यः नित्यत्वं यानि कानि च पापानि ब्रह्महत्यासमानि च अ

न्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे इत्यादिवाक्यैरकरणे प्रत्यवायप्रतिपादनात् गृहस्थानां भुक्त्यामात्रे नित्यत्वं

एकादश्यां न भुंजीत पक्षयोरुभयोरपि वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही इति स्मरणात् शयनीबोधनी मध्ये

या कृष्णैकादशी भवेत् सैवोपोष्या गृहस्थानां नान्या कृष्णा कदाचन १ संक्रांत्यामुपवासं च कृष्णैकादशीवासरे चं

द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही २ आदित्येऽहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः पारणं चोपवासं च न कुर्यात्पुत्र

वान् गृही ३ अथ वर्षाधिकोऽष्टवर्षो ह्यशीतिन्यूनवत्सराः एकादश्युपवासस्य तत्पक्षयोरुभयोरपि १ दशम्यां द्वादश्यां एकभक्ता

दि नियमाः काम्यव्रतपरास्तत्र पराव्रतस्तत्रो त्वेकादश्यां भक्तद्वयवर्जनमावश्यकं तथा विष्णुसायुज्यमाप्नुयात् सायंप्रा

तरम्मध्यमे उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयं अथ नित्योपवासी चेत्सायंप्रातर्भुजिक्रियां वर्जयेन्मतिमान्विप्रः संप्राप्ते ह

रिवासरे १ शयन्यामथ गृह्णीयात्संक्रांतौ कर्कटस्य वा आषाढ्यां वा नरो भक्त्या चातुर्मास्यपोदितं व्रतं २ मंत्रः इदं व्रतं मया

देव गृहीतं पुरतस्तव गृहीते स्मिन्व्रते देव पंचत्वं यदि मे भवेत् तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन १ व्रतार्के उ १०

द्वितीयायां हरिसंक्रमाद्वरे रेकाधिके विंशति मेत्यगस्त्यः सप्तर्षिभिस्तं वृषसंक्रमाच्च श्रवादिगर्गादिभिरप्यभाणि ॥ १ क्रोधा
त्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि दिनत्रयं न भुंजीत मुंडनं शिरसोथवा २ प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्
भार्यापत्युर्व्रतं कुर्यात् भार्यायाश्च पतिर्व्रतं असामर्थ्ये सुतस्ताभ्यां व्रतभंगो न जायते अन्यस्माद्वा स्नाताद्वापि अप्रांतःकार
येध्रुवं व्रतं ॥ व्रतछिद्रतायै मंत्राः ब्राह्मणा यत्र भाषंते तन्मन्यंते दिवौकसः सर्वदेवमया विप्राः न तद्वचनमन्यथा १
जलधिः क्षारतां नीतः पावकः सर्वभक्षतां सहस्रनेत्रः शक्रोपि कृतो विप्रैर्महात्मभिः २ ब्राह्मणानां तु वचनाद्ब्रह्मह त
त्या विनश्यति अश्वमेधफलं साग्रं लभ्यते नात्र संशयः ३ व्यासवाल्मीकवचनात्पराशरवसिष्ठयोः गर्गगौतम
दा धौम्यात्रिगालवांगिरसां तथा वचनान्नारदीनां च शां भवतु मे व्रतं गतोयं वचश्रेयं दूशतः ॥ भाद्रशुक्लचतुर्थ्यां च ये
चंद्रं पश्यंति मानवाः मिथ्यापवादमायांति ते प्राप्स्यंति न संशयः मासादौ पूर्वमेव त्वां ये पश्यंति सदा जनाः भाद्रपद्यां शुक्ल
पक्षस्य तेषां दोषो न जायते ॥ कार्तिककृष्णचतुर्थीतव्रते स्त्रीणामधिकारस्तत्फलं सौभाग्यपुत्रपौत्रादि सुस्थिर
श्रीलाभः तद्दिने शुभे स्थाने वटं विलिख्य तदधः शिवं षण्मुखयुतां गौरीं विलिख्य षोडशोपचारैरर्चयेत् नमः
शिवायै शर्वाण्यै सौभाग्यं संततिं शुभां प्रयच्छ भक्तियुक्तानां नारीणां हरवल्लभे एवं नमोनमंत्रेण शिवगु
हावर्चयो ततः सकरकान्दश पक्वान्नान्ब्राह्मणाय दद्यात् पिष्टकनैवेद्यं भोज्यं चंद्रोदये चंद्रायार्घ्यं दद्यात् कर

केन्नीरसंपूर्णां तोयपूर्णा यथापि वा ददामि रत्नसंयुक्तं चिरंजीवतु मे पतिः इति मंत्रेणाकरकान्प्रदद्यात् द्विजसत्तमः
॥ सुवासिनीभ्यो दद्याच्च आदद्यान्नाभ्य एवच एवं व्रतं या कुरुते नारी सौभाग्यकाम्यया सौभाग्यं पुत्रपौत्रादि लभते सुस्थि
राश्रियं इति भुक्त्वादि श्रावणकृष्णसप्तम्यां शीतलाव्रतं तत्फलं भवेधव्याद्दारिद्र्य भर्तृवियोगपुत्रसुखधनधान्याप्र
यः तद्दिने जलपूर्णां कलशोपरि शीतलां नामा वाह्यार्चयेत् वंदेहं शीतलां देवीं रासभस्थां दिगंबरां मार्जनीकलशोपे
तां सूर्पालंकृतमस्तकां कुंभे संस्थापये देवीं पूजये न्नाममंत्रतः शीतले त्वं हर मे पापं पुत्रसौख्यफलप्रदे धन
धान्यप्रदे देवी पूजां गृह्ण नमोस्तु ते इति अर्घ्यं शीतले शीतलाकारे अवैधव्यफलप्रदे श्रावणस्यासिते पक्षे
अर्घं गृह्ण नमोस्तु ते इत्यर्घं दत्वा शीतलेषानि पक्वानि मिष्टानि सदधानि च नैवेद्यं च प्रकुर्वीत घृतपुष्पाणि सु
ंदरि १ इति तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् परतो तु न कर्तव्यं पापवन्नैकस्य संशयः पाःकश्चित्
पयो श्रोक्ता पुराणानन्द्दाच्यये गतः कृत्वां ते परतां कुर्याद्विनाश्रवणारोहिणी श्रावणकासितपक्षेषु मैत्रश्रवणरे
वती संगमैनैव भोक्तव्या द्वादशाद्दशीं हरेत् मैत्रादिपादे स्वपतीह विष्णुः सृतेष्व मध्ये परिवर्त्तते च पौष्णा
वसाने विजगति निद्रां तत्कालभोजी नरकं प्रयाति १ मुहूर्तमपि चेद्भाद्रे पौर्णमास्यां चतुर्दशी संपूर्णां तां वि
दुस्तस्यां पूजये विघ्नमव्ययं २ भविष्ये कृष्णवचं युधिष्ठिरं प्रति ॥ संप्राप्ते श्रावणस्यान्ते पूर्णिमायां दिनोद ११

ये स्नानं कुर्वीत मतिमान्दृष्कतिस्मृतिविधानतः ततो देवान्पितृंश्चैव तर्पयेत्परमं मम उपाकर्मादिकं प्रोक्तं म‍षी

णांचैव तर्पणं। अ स्फतोः क्षत्रियो वैश्यैः शूद्रैश्चापि समानवैः कर्नयो रक्षिकावंधो द्विजान्संपूज्य भक्तितः ३

येन बद्धो बली राजा दानवेन्द्रो महाबलः तेन त्वां प्रतिबध्नामि रक्षे माचल माचल ४ यः आवणो विमलमासि

विधानविद्भो रक्षाविधानमिदमाचरते मनुष्यः आस्ते सुखेन परमेणाच वत्सरांतं पुत्रैः प्रपौत्रसहितः सज

नो धनाद्यः ५ रक्षावंधश्च भद्रायां न कार्यः भद्रायां द्वेन कर्तव्ये श्रावणी (फाल्गुनी) नीतया श्रावणी नृपतिं द

ति ग्रामं दहति फाल्गुनी इति वचनात् ब्रतार्कनउद्धृत भारते आमार्कपात श्रवणैर्युक्ताचेत्पौष माघ

योः अर्धोदयः सविज्ञेयः कोटिसूर्यग्रहैः समः १ दिवैव योगो यं प्रशस्तो न तु रात्रौ कदाचिनः तस्मिन्दिने पूर्वान्हे

संगमे स्नात्वा ह्लनावरूपको गोमयेपालिप्त शुचिभूमौ सागरसतत्र यद्दोणा तिल पर्वतोपरि सुवर्णमयी ब्रह्मवि

ष्णुशिवप्रतिमाः संस्थाप्य तत्र देवतं ब्रूतं देवाः कोटिश्च भुक्तिमुक्तिदं भवंतु सन्निधो मेद्य स्नायो देवास्तपा

नयः इति नियमं गृहीत्वा षोडशोपचारैः पृथक्पृथग्रभ्यर्च्य वन्हिं संस्थाप्य हुत्वा तत्रीन पेगोत्रयं दत्वा

प्रतिमादिकं च आचार्याय समर्प्य पायसादिना ब्राह्मणान्भोजयेत् हेममयी दक्षिणा तत्फलं च अश्वमे

धादिसर्वयज्ञानुष्ठानगंगाप्रयागादिसर्वतीर्थस्नानससागरद्वीपधरादानजन्मपुण्यसमपुण्यफलावाप्तिर्दीर्घायुर्विपुलप
शोनपापसंततिस्थिरलक्ष्मीप्राप्तिंशाक्राद्यष्टलोकपालपुराधिकरणोकस्वर्गेदगतिब्रह्मादिलोकाधिकरणोकस्तवहु
मानचिरकालैकवासश्रेतफलम् प्रांरवः अमावस्यातुसोमेनसप्तमीभानुनासह चतुर्थीभूमिपुत्रेणसोमपुत्रे
णचाष्टमी । चतस्रस्तिथयःस्त्वेताःसूर्यग्रहणसन्निभाः । तत्रसोमवत्याममायांप्रातर्जलाशयेस्नात्वाकौशेयंपरिधा
याश्वत्थमूलमागत्य ॐअव्यक्तावयक्तस्वरूपायसृष्टिस्थितिअंतकारिणे आदिमध्यान्तहीनायविष्णवेअश्वत्थायनमः । इति
मंत्रेणविष्णुमभ्यर्च्य ॐअश्वत्थहुतभुग्वासगोविंदस्यसदाश्रय अशेषंहरमेपापंवृक्षराजनमोस्तुते । इत्य
श्वत्थंसंपूज्यसोमायवारायनमः सोमायेनमः इतिचाभ्यर्च्य मौक्तिककांचनरजतवस्त्रमणिमुद्गप्रभृतिकांस्यतां
म्रादिपात्रादिकंदीरद्धेपुष्पमूलवसनादिकंहस्तेगृहीत्वाष्टोत्तरसतंप्रदक्षिणाःकुर्यात् तत्रवस्तुजातं
विप्रेभ्यःपुरंध्रीभ्यश्चदेयंस्वयंचब्राह्मणान्संभोज्यतदनुज्ञयानिशिनिजबांधवैःसहभोक्तव्यम् अथमलमासवि
येचमासासंक्रांतातेषांस्वामीरविस्मृतः असंक्रांतास्तुयेमासास्तेषांस्वामी~~रविस्मृत~~जनार्दनः । तमुद्दिश्यच
यत्किंचित्स्वल्पंवायदिवाबहुः अक्षय्यंतुभवेत्कर्तुर्जन्मनामयुतावधिः । तत्रप्राक्तोप्रतिदिनमप्राक्तोपर्वसुव्यती
पातादियोगेसाज्यसगुडत्रयस्त्रिंशद्पूपकान्सहिरण्यान्कांस्यपात्रेनिधाय विष्णुरूपीसहस्रांशुःसर्वपापप्रणा

स्नानः अक्षय्यान्नप्रदानेन मम पापं व्यपोहतु १ यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनं शंखः करतले यस्य स मे विष्णुः प्रसीदतु २ कुरुक्षेत्रमयं देशः कालः पार्थो द्विजो हरिः पृथ्वीसममयं दानं गृहाण पुरुषोत्तम ३ इति मंत्रेण द्विजाय दद्यात् चंद्रोंशुनिर्मलाः शुभ्राः शालितंडुलमिश्रिताः आहाराः सर्वदेवानां मम कुर्वंतु मंगलं १ तत्फलम् पृथ्वीदानजपुण्यप्राप्तिः अक्षय्यगतच्छिद्रसंख्यामिता वत्सराः वच्छिन्न स्वर्गवासः सर्वपापप्रशमन पुत्रपौत्रादिसंतानवृद्धिश्रीसमृद्धिरोगशोकादिहानयः॥ इति॥ आषाढ्यां पौर्णमास्यां च व्यासपूजाकृतो नराः पुत्रपौत्रादिसंपन्नं लभंते फलमव्ययं १ मानुष्यं जन्म संप्राप्य व्यासपूजाकृता तु यैः तेषां प्रेत्य फलं शुद्धं भविष्यति न संशयः २ आषाढः पौर्णिमास्यां तु व्यासपूजाविवर्जनात् आजन्मतः कृतं पुण्यं नश्यत्येव न संशयः ३ न करोति हि यो मूढः स्वशक्तिविभवे सति पूजां वै व्यासिकीं पुण्यां व्यथा तेषां पतिर्भवेत्: ४ पूर्णिमास्यां नरः श्रेष्ठ पूजनाद्विमुखो नरः यास्येपाशैः स्कंससंबद्धः कष्टं प्राप्नोति दारुणम्॥ इति॥ अथ ज्येष्ठ शुक्लदशम्यां गंगावतीरेण त्वा गंगां पूजयेत् तत्र विधिः हेम्ना रजतेन वा गंगामूर्तिं निर्माय पंचामृतेन स्नाप्य सवस्त्रपूर्णकुंभोपरि प्रतिष्ठाप्य चतुर्भुजां त्रिनेत्रां च नदनदनिषेवितां लावण्यामृतनिस्यंदरससीलद्गात्रयष्टिकां पूर्णकुंभसिताम्भोजवरदाभयसत्कराम् ततो ध्यायेत्सुसौम्यास्यां चंद्रायुतसमप्रभां चामरैर्वीज्यमानां च श्वेतछत्रोपशोभितां सुधाप्लाविताभूपृष्ठां शुद्ध गंधानुलेपनां त्रैलोक्य

13

रजितपदां देवर्षिभिरभिष्टुतां इति ध्यात्वा ॐ शिवायै नारायण्यै दशहरायै गंगायै स्वाहेति मंत्रेण दशदशोन्मितैः
पुष्पैर्धूपैर्नैवेद्यैः सघृतगुडशक्तुमयदशपिंडान्निवेदयेत् आज्यतिलानां च दशप्रसृतीस्तोये क्षिपेत् तमेव
मंत्रं जपेत् तेनैव जुहुयात् तदग्रे च ब्रह्मविष्णुरुद्रसूर्यहिमाचलभगीरथजह्नूनेतान्निर्मायार्चयेत्
मत्स्यकूर्ममकरमंडूकबकहंसकारंडवचक्रटिट्टिभादीन् यथाशक्ति स्वर्णरजतताम्रपिष्टादिनिर्मितानां गंधादिभि-
रर्चितानां गंगायां क्षिपेत् उपवासरात्रिजागरणाभ्यां दशविधपापनिवृत्तिः गंगास्तोत्रादिकं च पठनीयं स्तेयं हिं-
सा परस्त्रीगमनं ३ पारुष्यानृतपैशुन्यासंबद्धप्रलापाः ४ परस्वेप्सा द्रोहः वितथाभिनिवेशः ३ इति १० पापानि द-
शार्थं दशापरस्त्विन्द्वारः इत्यलं॥ दशप्रस्थांस्तिलान्दद्या दशविप्रेभ्यश्चादरात् पलं च कुडवं प्रस्थमा-
ढको द्रोण एव च धान्यमानेषु बोधव्याः क्रमशोऽमी चतुर्गुणाः ॥१५॥

१३

शिशुमारकं दंत्याणीवोधेनवोवास्यमानाः ३ आत्वाकुमारस्तरुण आवत्सोजगदैः सह ४ आत्वापरिस्रुतः कुंभ आदध्नः कलशैरुप
५ ततस्तंभचतुष्कस्थापनमंत्रः इमम्स्यपत्नीगृहगोसु खासारथिनो धेहि सुभगे सुवीर्या अश्वावहो मदूर्जस्वत्यर्तावनस्पतिरिवाभितः पूर्वे
नाथं रयिं हि हमणिमनुष्येपोचमानः स्वाहा इति स्तंभपठनीयः स्तंभाभावे प्रत्यवटेमनेन मंत्रेण शिलां स्थापयेत् ततोर्द्धनिष्पन्नायां शिला
यां शूलानामध्ये पतिसम्हृहनादिपंचभूसंस्कारसंस्कृते देशे कांस्यपात्रं नीत्वा अग्निं स्थाप्य अथ शालाकर्माहं करिष्य इति संकल्प्य वा
स्तोष्पतिप्रजापतिप्रभृतीन् देवानाभिधाय अद्य कर्तव्यगृहप्रतिष्ठायागांगभूतहोमकर्मणि कृताकृतावेक्षणकर्मकर्तुं ब्रह्मत्वेन त्वाम
हं वृणे इति ब्राह्मणं वृत्वा चरुसहितां कुशकंडिकां कुर्यात् तत्र ब्रह्मोपवेशनादि आग्नेयवत् आज्यस्थाल्याग्रे चरुस्थालीं सादनीया
आज्यस्थाल्यां पश्चात् संनिवीप्य प्रतीताज्यं किंचिच्चरोनिधायतेनैव तंडुलानां प्रक्षाल्य चरौ क्षिपेत् स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यंव
ह्नावुत्तरतः [illegible] कं दक्षिणतः आज्यं निदध्यात् कुशांश्च ज्याल्य हविर्द्वयोपरि दक्षिणतो भ्रामयित्वाग्नौ तद्विस्वाभ्यंते चरोः पर्यग्निकरणपनादि
कं कृत्वा आज्यमग्नितश्चरोः पूर्वेणानीयाग्नेर्निदध्यात् पश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् इति विशेषः प्रथमं स्रुवे
णाज्याहुतयश्चत्वारः ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे
शं चतुष्पदे स्वाहा इदं वास्तोष्पतये १ ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो अजरासस्ते सख्ये स्याम
पितेव पुत्रान्प्रति नो जुषस्व स्वाहा २ इदं वास्तोष्पतये २ ॐ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या पाहि क्षेम उ
त योगे वरं नो यूयं पात स्वस्तिभिः सदा नः स्वाहा इदं वास्तोष्पतये ३ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् सखा सुशेव
एधि नः स्वाहा इदं वास्तोष्पतये ४ ततः आघारावाज्यभागौ हुत्वा प्रजापति इंद्र अग्नि सोम ततः स्थालीपाकेन षडाहुतयः अग्नि ।

14

16